# ॥ গোপীগীতম্ ॥

গোপ্য ঊচুঃ ।
জযতি তেঽধিকং জন্মনা ব্রজঃ
শ্রযত ইন্দিরা শশ্বদত্র হি ।
দযিত দৃশ্যতাং দিক্ষু তাৱকা-
স্ত্বযি ধৃতাসৱস্ত্বাং ৱিচিন্বতে ॥ 1॥
শরদুদাশযে সাধুজাতস-
ত্সরসিজোদরশ্রীমুষা দৃশা ।
সুরতনাথ তেঽশুল্কদাসিকা
ৱরদ নিঘ্নতো নেহ কিং ৱধঃ ॥ 2॥
ৱিষজলাপ্যযাদ্ব্যালরাক্ষসা-
দ্বর্ষমারুতাদ্বৈদ্যুতানলাত্ ।
ৱৃষমযাত্মজাদ্বিশ্বতোভযা-
দৃষভ তে ৱযং রক্ষিতা মুহুঃ ॥ 3॥
ন খলু গোপিকানন্দনো ভৱা-
নখিলদেহিনামন্তরাত্মদৃক্ ।
ৱিখনসার্থিতো ৱিশ্বগুপ্তযে
সখ উদেযিৱান্সাত্বতাং কুলে ॥ 4॥
ৱিরচিতাভযং ৱৃষ্ণিধুর্য তে
চরণমীযুষাং সংসৃতের্ভযাত্ ।
করসরোরুহং কান্ত কামদং
শিরসি ধেহি নঃ শ্রীকরগ্রহম্ ॥ 5॥
ব্রজজনার্তিহন্বীর যোষিতাং
নিজজনস্মযধ্বংসনস্মিত ।
ভজ সখে ভৱত্কিংকরীঃ স্ম নো
জলরুহাননং চারু দর্শয ॥ 6॥
প্রণতদেহিনাং পাপকর্শনং
তৃণচরানুগং শ্রীনিকেতনম্ ।
ফণিফণার্পিতং তে পদাংবুজং
কৃণু কুচেষু নঃ কৃন্ধি হৃচ্ছযম্ ॥ 7॥
মধুরযা গিরা ৱল্গুৱাক্যযা
বুধমনোজ্ঞযা পুষ্করেক্ষণ ।
ৱিধিকরীরিমা ৱীর মুহ্যতী-
রধরসীধুনাঽঽপ্যাযযস্ব নঃ ॥ 8॥
তৱ কথামৃতং তপ্তজীৱনং
কৱিভিরীডিতং কল্মষাপহম্ ।
শ্রৱণমংগলং শ্রীমদাততং
ভুৱি গৃণন্তি তে ভূরিদা জনাঃ ॥ 9॥
প্রহসিতং প্রিয প্রেমৱীক্ষণং

ৱিহরণং চ তে ধ্যানমংগলম্ |
রহসি সংৱিদো যা হৃদিস্পৃশঃ
কুহক নো মনঃ ক্ষোভযন্তি হি || 10||
চলসি যদ্ৱ্রজাচ্চারযন্পশূন্
নলিনসুন্দরং নাথ তে পদম্ |
শিলতৃণাংকুরৈঃ সীদতীতি নঃ
কলিলতাং মনঃ কান্ত গচ্ছতি || 11||
দিনপরিক্ষযে নীলকুন্তলৈ-
র্ৱনরুহাননং বিভ্রদাৱৃতম্ |
ঘনরজস্ৱলং দর্শযন্মুহু-
র্মনসি নঃ স্মরং ৱীর যচ্ছসি || 12||
প্রণতকামদং পদ্মজার্চিতং
ধরণিমংডনং ধ্যেযমাপদি |
চরণপংকজং শন্তমং চ তে
রমণ নঃ স্তনেষ্ৱর্পযাধিহন্ || 13||
সুরতৱর্ধনং শোকনাশনং
স্ৱরিতৱেণুনা সুষ্ঠু চুম্বিতম্ |
ইতররাগৱিস্মারণং নৃণাং
ৱিতর ৱীর নস্তেঽধরামৃতম্ || 14||
অটতি যদ্ভৱানহ্নি কাননং
ত্রুটির্যুগাযতে ত্ৱামপশ্যতাম্ |
কুটিলকুন্তলং শ্রীমুখং চ তে
জড উদীক্ষতাং পক্ষ্মকৃদ্দৃশাম্ || 15||
পতিসুতান্ৱযভ্রাতৃবান্ধৱা-
নতিৱিলংঘ্য তেঽন্ত্যচ্যুতাগতাঃ |
গতিৱিদস্তৱোদ্গীতমোহিতাঃ
কিতৱ যোষিতঃ কস্ত্যজেন্নিশি || 16||
রহসি সংৱিদং হৃচ্ছযোদযং
প্রহসিতাননং প্রেমৱীক্ষণম্ |
বৃহদুরঃ শ্রিযো ৱীক্ষ্য ধাম তে
মুহুরতিস্পৃহা মুহ্যতে মনঃ || 17||
ৱ্রজৱনৌকসাং ৱ্যক্তিরংগ তে
ৱৃজিনহন্ত্র্যলং ৱিশ্ৱমংগলম্ |
ত্যজ মনাক্ চ নস্ত্ৱত্স্পৃহাত্মনাং
স্ৱজনহৃদ্রুজাং যন্নিষূদনম্ || 18||
যত্তে সুজাতচরণাম্বুরুহং স্তনেষ
ভীতাঃ শনৈঃ প্রিয দধীমহি কর্কশেষু |
তেনাটৱীমটসি তদ্ব্যথতে ন কিংস্ৱিত্
কূর্পাদিভির্ভ্রমতি ধীর্ভৱদাযুষাং নঃ || 19||

ইতি শ্ৰীমদ্ভাগৱত মহাপুরাণে পারমহংস্যাং সংহিতাযাং
দশমস্কন্ধে পূৰ্ৱাৰ্ধে রাসক্রীডাযাং গোপীগীতং নামৈকত্রিংশোঽধ্যাযঃ ||